- Title – अष्टांगहृदय की टीका
- Accession No – Title –
- Accession No –
- Folio No/ Pages –
- Lines-
- Size
- Substance Paper –
- Script Devanagari देवनागरी
- Language – संस्कृत
- Period –
- Beginning –
- End –
- Colophon-
- Illustrations -
- Source -
- Subject - संस्कृत हेमाद्री टीका
- Revisor -
- Author -

1. Remarks- अपूर्ण

मत्तालुनेयवह्राःशिराः ४६ संशोष्यंतस्रोजायंतेनानांह्वामान्यलक्षणं मुखशोषोजला

तृप्तिरन्नेद्वेषःस्वरक्षयः ४७ कंठोष्ठजिह्वाकार्कश्यंजिह्वानिःक्रमणंक्लमः प्रलापश्छिन्नवि

भ्रमस्तृड्दाहोत्कास्तथामया ४८ मारुतात्क्षामतादैन्यंशंखतोदःशिरोभ्रमः गंधाज्ञानास्य

श्रुतिनिद्राबलक्षयाः ४९ शीतांबुपानाद्वृद्धिश्चपित्तान्मूर्छास्यतिक्तता रक्तेक्षणत्वंप्रततं

शोषोदाहोतिधूमकः ५० कफोत्कटत्वहिकुपितस्तावबाह्हिबुमारुतं आतस्तुसकफस्तेनपं

कवत्कोष्ठवतेततः ५१ सूकैरिवाचितःकंठोनिद्रामधुरवक्त्रता आध्मानंशिरसोजाड्य

स्तैमित्यंछर्द्यरोचकाः ५२ आलस्यमविपाकश्चसर्वैस्यात्सर्वलक्षणं आमोद्भवाच्चभक्त

स्यसंरोधाद्वातपित्तजा ५३ उत्क्रांतस्यसहसापीतांभोभजनस्तथा ऊष्मास्त्रोगतःकोष्ठ

यांकुर्यात्पित्तजेवसा ५४ यान्यपानातिपानोत्थातीक्ष्णाग्नेःस्नेहजाचया स्निग्धगुर्वम्ल

लवणभोजनेनकफोद्भवा ५५ तृष्णारसक्षयोक्तेनलक्षणेनक्षयात्मिका शोषमो

हज्वराद्यन्यदीर्घरोगोपसर्गतः ५६ यातृष्णाजायतेतीव्रासोपसर्गात्मकास्मृता इति

श्रीसिंहगुप्तस्यसूनुनावाग्भटेनकृतेऽष्टांगहृदयेराजयक्ष्मादिनिदानंनामपंचमोध्यायः ५

वैरस्य २

राम
१

श्रवणादिभिः ३५ तप्तेचित्तेहृदिक्लिष्टेकुर्द्दिष्टार्थयोगजा॥ वातादीनेवविमृशे
कृमिन्तृष्णामदौहृदे ३६ शूलवेपथुहृल्लासैर्विशेषात्कृमिजांवदेत् कृमिहृद्रोग।
लिंगैश्चस्मृताःपंचतुहृद्रुजाः ३७ तेषांगुल्मनिदानोक्तैःसमुत्थानैश्चसंभवः॥
वातेनशूल्यतेत्यर्थंतुद्यतेस्फुटतीवच भिद्यतेशुष्यतिस्त[illegible]ब्धंहृदयंशून्यता
द्रवः अकस्माद्दीनताशोकोभयंशब्दासहिष्णुता ३९ वेपथुर्वेष्टनंमोहःश्वासरो।
धोल्पनिद्रता॥ पित्तात्तृष्णाभ्रमोमूर्छादाहःस्वेदोम्लकःक्लम ४· छर्दनंचाम्लपित्तस्य
धूमकःपीनताज्वरः॥ श्लेष्मणाहृदयंस्तब्धंभारिकंसाश्मगर्भवत् ४१ कासाग्नि
सादनिष्ठीवनिद्रालस्यारुचिज्वराः॥ सर्बलिंगस्त्रिभिर्दोषैः॥ कृमिभिःश्यावनेत्रता ४२
तमःप्रवेशोहृल्लासःशोषःकंडुकफस्रुतिः हृदयंप्रततंचात्रक्रकचेनेवदार्यते ४३
चिकित्सेदामयंघोरंतंशीघ्रंशीघ्रकारिणं॥ वातात्पित्तात्कफात्स्यात्सन्निपाताद्रसक्ष
यात् ४४ षष्ठीस्यादुपसर्गाच्चवातपित्तेतुकारणं सर्बासुतत्रकोपोहिसौम्यधातु
प्रशोषणात् ४५ सर्बादेहभ्रमोत्कंपतापतृड्दाहमोहकृत्॥ जिह्वामूलगलक्लो।

यक्ष्मानिदानंव्याख्यास्यामः अनेकरोगानुगतोवहुरोगपुरोगमः राजयक्ष्माक्षयःशोषो
६ रा० रोगराडितिचस्मृतः १ नक्षत्राणांद्विजानांचराज्ञोभूद्यदयंपुरा यच्चराजाचयक्ष्माचराज
यक्ष्माततोमतः २ देहौषधक्षयकृतेः क्षयस्तत्संभवाच्चसः रसादिशोषणाच्छोषोरोगरा
ट्तेषुराजनात् ३ साहसंवेगसंरोधः शुक्रौजःस्नेहसंक्षयः अन्नपानविधित्यागश्चत्वा
रस्तस्यहेतवः ४ तैरुदीर्णोनिलःपित्तंकफंचोदीर्यसर्वतः शरीरसंधीनाविश्यतान्शि
राश्चप्रपीडयन् ५ मुखानिस्रोतसांरुध्वातथैवातिविवृत्यवा सर्वान्रुद्धमधस्तिर्यग्यथा
स्वंजनयेद्गदान् ६ रूपंभविष्यतस्तस्यप्रतिश्यायोभृशंक्षवः प्रसेकोमुखमाधुर्यंसदनंव
ह्निदेहयोः ७ स्थाल्यमत्रान्नपानादौशुचावप्यशुचीक्षणं मक्षिकातृणकेशादिपातः
प्रायोन्नपानयोः ८ हृल्लासश्छर्दिररुचिरश्नतोपिबलक्षयः पाण्योरवेक्षापादास्यशो
फोक्ष्योरतिशुक्लता ९ वाह्वोःप्रमाणजिज्ञासाकायेवैभत्स्यदर्शनं स्त्रीमद्यमांसप्रिय
ताघृणित्वंमूर्द्धगुंठनं १० नखकेशातिवृद्धिश्चस्वप्नेचाभिभवोभवेत् पतंगकृकलासा
हिकपिश्वापदपक्षिभिः ११ केशास्थितुषभस्मादिराशौसमधिरोहणं शून्यानांग्रामदे

शामं सात्म्यान्नपानेन याप्रयाति च सान्नजा ॥ आयासात्पवनः क्रुद्धः क्षुद्रां हिध्मां प्रवर्त्तये
त् २१ जत्रुमूलप्रविसृता मंदवेगां मुहुश्च सा वृद्धिमायासतो याति भुक्तमात्रे च मा
र्द्दवं २२ ॥ चिरेण यमलैर्वेगैराहारे या प्रवर्त्तते परिणामोन्मुखे वृद्धिं परिणामे च ग
च्छति २३ कंपयंती शिरो ग्रीवमाध्मातस्यातितृष्यतः प्रलापच्छर्द्यतीसारनेत्रवि
प्लुतजृंभिणः २४ यमला वेगिनी हिध्मा परिणामवती च सा ॥ स्तब्धभ्रूशंखयुग्म
स्य सास्रुविप्लुतचक्षुषः स्तंभयंती तनुं वाचं स्मृतिं संज्ञां च मुष्णती रुंधती मार्गमन्न
स्य कुर्वती मर्म्मघट्टनं २६ पृष्ठतो नमनं शोषं महाहिध्मा प्रवर्त्तते महामूला महाश
ब्दा महावेगा महाबला २७ ॥ पक्वाशयाद्वा नाभेर्वा पूर्ववद्या प्रवर्त्तते तद्रूपा सा मुहुः कु
र्यात् जृंभामंगप्रसारणं २८ गंभीरेणानुनादेन गंभीरां तामुसाधयेत् आद्ये द्वे वर्ज
येदंत्ये सर्वलिंगा च वेगिनी २९ सर्वाश्च संचितैर्मस्य स्थविरस्य व्यवायिनः व्याधि
भिः क्षीणदेहस्य भक्तच्छेदक्षतस्य वा २ ॥ सर्वेपि रोगा नाशाय नत्वेवं शीघ्रकारिणः हि
ध्माश्वासौ यथा तौ हि मृत्युकाले कृतालयौ ३१ इतिश्री चतुर्थोध्यायः अथातो राज

5

अविवर्द्धते हिधा व्यस्तमकः साध्यो नवो वा बलिनो भवेत् १० ॥ ज्वरमूर्छापुतः शीतैः
शाम्येत्प्रतमकस्तु सः छिन्नात्स्वसिति विछिन्नं मर्मछेदरुजार्दितः ११ सस्वेदमूर्छासा
नाहो वस्तिदाहनिरोधवान् अधोदृग्विप्लुताक्षश्च मुह्यन्रक्तैकलोचनः १२ शुष्का
स्यः प्रलपदीनो नष्टछायो विचेतनः ॥ महता महता दीनो नादेन स्वसिति क्रथम् उद्धू
यमानः संरब्धो मत्तर्षभ इवानिशं प्रणष्टज्ञानविज्ञानो विभ्रांतनयनाननः वक्षस्
माक्षिपन्बद्धमूत्रवर्चा विशीर्णवाक् शुष्ककंठो मुहुर्मुह्यन् कर्णशंखशिरोतिरुग् १५
॥ दीर्घमूर्द्धस्वसित्युक्षीनं तं प्रत्याहरत्यधः श्लेष्मावृतमुखस्रोतः क्रुद्धगंधवहार्दितः १६
ऊर्द्धदृक्वीक्षते भ्रांतमक्षिणी परितः क्षिपन् मर्मसु छिद्यमानेषु परिदेवी निरुद्धवाक् १७
एते सिद्ध्ययुरव्यक्ता व्यक्ताः प्राणहरा ध्रुवं ॥ स्वासैकहेतुप्राग्रूपसंख्याप्रकृतिसंश्रयाः १८
हिध्मा भक्तोद्भवा क्षुद्रा यमला महतीति च गंभीरा च ॥ मरुत्तत्र त्वरयायुक्तिसेवितैः १९
रूक्षतीक्ष्णखरासात्मैरन्नपानैः प्रपीडितः करोति हिध्मा मरुज़ां मंदशब्दां क्षवानुगां २

हि ५

राम

अथातः श्वासहिध्मानिदानं व्याख्यास्यामः कासवृद्ध्या भवेच्छ्वासः पूर्वैर्वा दोष
कोपनैः आमातिसारवमथुविषपांडुज्वरैरपि १ रजोधूमानिलैर्मर्मघाता
दतिहिमांबुना क्षुद्रकस्तमकश्छिन्नो महानूर्ध्वश्च पंचमः २ कफोपरुद्धगम
नः पवनो विष्वगास्थितः प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन् ३ उर
स्थः कुरुते श्वासमामाशयसमुद्भवं प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोम
ता ४ आनाहः शंखभेदश्च तत्रायासातिभोजनैः प्रेरितः प्रेरयेत् क्षुद्रं स्वयं संशमनं
मरुत् ५ प्रतिलोमं सिरा गच्छन्नुदीर्य पवनः कफं परिगृह्य शिरोग्रीवमुरःपार्श्वे
च पीडयन् ६ कासं घुर्घुरकं मोहमरुचिं पीनसं तृषां करोति तीव्रवेगं च श्वासं प्रा
णोपतापिनं ७ प्रताम्येत्तस्य वेगेन निष्ठ्यूतान्ते क्षणं सुखी कृच्छ्राच्छयानः श्व
सिति निषण्णः स्वास्थ्यमृच्छति ८ उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमर्तिमान् वि
शुष्कास्यो मुहुः श्वासी कांक्षत्युष्णं सवेपथुः ९ मेघांबुशीतप्राग्वातैः श्लेष्मलै

हृत्क्षोभः स्वरक्षयं करोति शुष्ककासं च महावेगरुजास्वनं सोंगहर्षी कफं शुष्कं कृच्छ्रान्मुक्त्वाल्पतां व्र
जेत् पित्तात्पीताक्षिकफता तिक्तास्यत्वं ज्वरो भ्रमः पित्तासृक्वमनं तृष्णा वैस्वर्यं धूमको मदः प्रतत
कासवेगेन ज्योतिषामिव दर्शनं कफादुरोल्परुक् मूर्द्धहृदयं स्तिमितं गुरु कंठोपलेपः सदनं पीन
सहृल्लारोचकाः रोमहर्षो घनः स्निग्धः श्वेतः श्लेष्मा प्रवर्त्तनं युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलं २२
उरस्यंतः क्षते वायुः पित्तेनानुगतो बली कुपितः कुरुते कासं कफं तेन सशोणितं २३ पीतं श्यावं च
शुष्कं च ग्रथितं कुथितं बहु ष्ठीवेत् कंठेन रुजता विभिन्नेन वचोरसा सूचीभिरिव तीक्ष्णाभिस्तुद्य
मानेन शूलिना पर्वभेदज्वरश्वासतृष्णावैस्वर्यकंपवान् पारावत इवाकूजन् पार्श्वशूली ततोस्य
च क्रमाद्वीर्यं रुचिः पक्ता बलं वर्णश्च हीयते ३ क्षीणस्य सासृङ्मूत्रत्वं स्याच्च पृष्ठिकटीग्रहः वायु
प्रधानाः कुपिता धातवो राजयक्ष्मिणः कुर्वंति यक्ष्मायतनैः कासं ष्ठीवेत्कफं ततः पूतिपूयोपमं पी
तं विस्रं हरितलोहितं लुच्यते इव पार्श्वे च हृदयं पततीव च अकस्मादुष्णशीतेच्छा बह्वाशित्वं बल
क्षयः ३३ स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता ततोस्य क्षयरूपाणि सर्वाण्याविर्भवंति च ३४ इत्ये
ष क्षयजः कासः क्षीणानां देहनाशनः याप्यो वा बलिनां तद्वत् क्षतजो नवौ तु तौ ३५ सिध्येता
मपि सानाथ्यात्साध्या दोषैः पृथक् त्रयः मिश्रा याप्या द्वयात्सर्वे जरसा स्थविरस्य च ३६ कासात्स्वा
सक्षयछर्दिस्वरसादादयो गदाः भवंत्युपेक्षया यस्मात्तस्मात्तं त्वरया जयेत् ३७ इति श्रीसिंहगुप्त
स्य सूनुना वाग्भटेन विरचिते ष्टांगहृदये कासनिदानं तृतीयं ३

उभयतः

नामविपाचनं स्वप्नेनक्षर्णादर्शीत्वं भवत्यस्मिन्नभविष्यति ॥ ऊर्द्ध्वं नासादिकर्णाक्ष्येभ्यो हि यानि गुदे
रधः कुपितं रोमकूपेभ्यस्तमसोऽस्तत्प्रवर्तते ॥ ऊर्द्ध्वं साध्यकफाद्यस्मात्तद्विरेचनसाधनं वह्न्यौषधं
च पित्तस्य विरेको हि वरौषधं अनुबंधी कफो यस्मात्तत्र तस्यापि शुद्ध्यति कषायाः स्वादवो ह्य
स्य विशुद्धस्य श्लेष्मणो हिताः किमुतिक्ताः कषाया वा येन निसर्गात्कफापहाः ॥ अधोऽपाय्य चलाद्य
स्मात्तत्प्रच्छर्दनसाधनं स्वल्पौषधं च पित्तस्य वमनं न वरौषधं अनुबंधी चलो यस्मात्तस्यैतेन
तस्यनतर् कषायाश्च हिता नास्य मधुरा एव केवलं ॥ कफमारुतसंसृष्टं मताद्यमुभयायनं ॥ न हि सं
शोधनं किंचिदस्यास्य प्रतिलोमने शोधनं प्रतिलोमं च रक्तपित्तं भिषक्जितं एवमेवोपशम
नं सर्वद्रोषास्य विघ्नते संसृष्टेषु हि दोषेषु सर्वजिल्लंघनं हितं तत्र दोषानुगमनं शिराभिः स्वदवलक्ष
येत् उपद्रवांश्च विकृतिज्ञानं तत्र तेषु वाधिकं ॥ आशुकारी यतः काससमेवातः प्रवक्ष्यते ॥ पंचका
सास्स्तावातपित्तश्लेष्मक्षतक्षयैः क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरं ॥ तेषां भविष्यतां स्या
त् कंठे कंडूररोचकः ॥ शूकपूर्णाभकंठत्वं सर्वतो भिहितोऽनिलः ऊर्द्ध्वप्रवृत्तः प्राप्योरस्तस्मिन् कं
ठे च संसज्जन् शिरःस्रोतांसि संपूर्य ततोंगान्युत्क्षिपन्निव क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पी
डयन् प्रवर्तते स वक्त्रेण भिन्नकांस्यसमध्वनिः हेतुभेदात्प्रतीघातभेदो वायोः सरंहसः यद्रुजा शब्दवै
षम्यं कासानां जायते ततः कुपितो वातलैर्वातः शुष्कोरःकंठवक्त्रतां हृत्पार्श्वोरःशिरःशूलमो

स्वार

दू[illegible]पतनमनोबलं सविपक्षो ज्वरं कुर्याद्विषमं क्षयवृद्धिभाक् दोषः प्रवर्त्तते
नेषां [illegible]यतन बली ५६ नित्यं त्वन्येद्युरेकत्वमत्वनीकबलावलात् ह्योकेदोष
ज्वरस[illegible]दोषवली गतेः ५८ सीनन्त्वात्कार्श्य वैवर्ण्य जाड्यादीनां दधाति सः आ
[illegible]त्व सारस्रवाहिनो आम्नु सर्वस्य वपुषा व्याप्तिर्दोषेण जायते स
तत सततः [illegible]विपरीतो विपर्ययात् विषमो विषमारंभक्रियाकालोनुषंगवान् दो
षो[illegible] करोति सततं ज्वरं अहोरात्रस्य सहृः स्थानस्थः कुरुतेन्येद्युराश्रितः
तस्मिन्नामसबद्धो नाड्यौ मेदोनाडीस्तृतीयकं मांसाही स्थितानिलान्मूर्द्धः त्रिकस्य कफपि
त्ततः सपृष्ठस्यानिलकफात्स वैकाहान्तरस्मृतः ५२ चतुर्थको मले मेदो मज्जास्था
न्यतमस्थितैः मज्जास्थ एवेत्यपरे प्रभावं स तु दर्शयेत् ७७ द्विधा कफेन जंघाभ्यां सं
शिरसो निलात् अस्थिमज्जो भयगतश्चातुर्थकविपर्ययः ७५ अहोद्युहस्त्वरय
तिद्विनमेकं विमुंचति वलाबलेन दोषाणां मन्त्वे ष्टाद्विजन्मना ज्वरः स्यान्मन
सस्तद्वत्कर्मणश्च नदानदा गंभीरधातुचारित्वात्सन्निपातेन संभवात् तुल्यारूपा
च्चेदोषाणां दुश्चिकित्स्यश्चतुर्थकः सृजत्युष्मस्त्वनरा[illegible]पुद्गृरात्रदूरतरेषु च दोषो
रक्तादिमार्गेषु शनैरल्पश्चिरेण यत् यात्निदेहव्यापोषसेननादीनकरोत्यतः
क्रमा यनेनविच्छिन्नसन्नाप लक्ष्ययेज्ज्वरः यथाग्नेर्भेदगतिर्भेदशक्तिर्येषा यथा

वा·
२२

धेऽपिवा ३५ तमाहुरर्द्दितंकेचिदेकायाममथापरे ॥ रक्तमाश्रित्यपवनःकुर्यान्मूर्द्धधरा
शिराः ३६ रूक्षाःसवेदनाःकृष्णाःसोऽसाध्यःस्यात्सिराग्रहः ॥ गृहीत्वार्द्धंतनोर्वायुःसि
राःस्नायूर्विशोष्यच ३७ पक्षमन्यतरंहंतिसंधिबंधान्विमोक्षयन् कृत्स्नोऽर्द्धकायस्त
स्यस्यादकर्मण्योविचेतनः ३८ एकांगरोगंतंकेचिदन्येपक्षवधंविदुः ॥ सर्वांगरोगं
तद्वच्चसर्वकायाश्रितेऽनिले ३९ ॥ शुद्धवातहतःपक्षःकृच्छ्रसाध्यतमोमतः कृच्छ्र।
स्त्वन्येनसंसृष्टोविवर्ज्यःक्षयहेतुकः ४० ॥ आमबद्धायनःकुर्यात्संस्तंभ्यांगंकफा।
न्वितः असाध्यंहतसर्वेहंदंडकंदंडकंमरुत् ४१ ॥ अंसमूलस्थितोवायुःसिराःसंकोच्य
च्यतत्रगाः बाहुप्रस्पंदितहरंजनयत्यवबाहुकं ४२ ॥ तलंप्रत्यंगुलीनांयाकंडराबा
हुपृष्ठतः बाहुचेष्टापहरणीविश्वाचीनामसास्मृता ४३ ॥ वायुःकट्यांस्थितःसक्थ्नः
कंडरामाक्षिपेद्यदा तदाखंजःभवेज्जंतुःपंगुःसक्थ्नोर्द्वयोरपि ४४ ॥ कंपतेगमना
रंभेखंजन्निवचयातियः कलायखंजंतंविद्यात्मुक्तसंधिप्रबंधनम् ४५ ॥ शीतो
ष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः जीर्णाजीर्णेतथायाससंक्षोभस्वप्नजागरैः ४६ ॥

बाह्यायामस्ततद्विधः २३ देहस्यबहिरायामात्पृष्ठतोनीयतेशिरः उरश्चोत्क्षिप्यते
तत्रकंधराचावमृद्यते २४ दंतेष्वास्यैववैवर्ण्यंप्रस्वेदःस्रस्तगात्रता बाह्यायामध
नुःस्तंभंब्रुवतेवेगिनंचतं २५ व्रणंमर्माश्रितंप्राप्यसमीरणःसमीरणात् व्या
प्नोतितनुंदोषाःसर्वामापादमस्तकं २६ तस्यतःपांडुगात्रस्यव्रणायामःसवर्जि
तः गतेवेगेभवेत्स्वास्थ्यंसर्वेष्वाक्षेपकेषुच २७ जिह्वातिलेखनात्शुष्कभक्षणा
दभिघाततः कुपितोहनुमूलस्थःस्रंसयित्वानिलोहनू २८ करोतिविवृता
स्यत्वमथवासंवृतास्यतां हनुस्रंसःसतेनस्यात्कृच्छ्राच्चर्वणभाषणं २९ वाग्वाहि
नीशिरासंस्थोजिह्वांस्तंभयतेनिलः जिह्वास्तंभःसतेनान्नपानवाक्येष्वनीशता ३०
शिरसाभारहरणादतिहास्यप्रभाषणात् उत्त्रासवक्त्रक्षवथुखरकार्मुककर्षणात् ३१
वक्रीकरोतिवक्त्रार्द्धमुन्नतंहसितमीक्षितं ततोस्यकंपतेमूर्द्धावाक्संगस्तब्धनेत्रता ३२
दंतचालःस्वरभ्रंशःश्रुतिहानिःक्षवग्रहः गंधाज्ञानंस्मृतेर्मोहःत्रासःसुप्तस्यजाय
ते ३४ निष्ठीवःपार्श्वतोयायादेकस्याक्ष्णोनिमीलनं जत्रोरूर्द्ध्वंरुजातीव्राशरीरार्द्धे।

विषमादुपधानाच्चकठिनानांचचर्वणात् वायुर्विवृद्धस्तैस्तैश्चवातलैरूर्द्धमास्थितः २

13

वा॰
२१

ते ४९ हृल्लासमास्यस्रवणमविपाकमरोचकं मूर्छाछर्दिज्वरानाहकार्श्यक्षवथुपी
नसान् ५० रक्तवाहिशिरोत्थाना रक्तजा जंतवोऽणवः अपादा वृत्तताम्राश्च सौक्ष्म्यात्के
चिददर्शनाः ५१ केशादा लोमविध्वंसा लोमद्वीपा उदुंबराः षट्ते कुष्ठैककर्माणः स
हसौरसमातरः ५२ पक्वाशये पुरीषोत्था जायंतेऽधोविसर्पिणः वृद्धास्ते स्युर्भवेयु
श्च ते यदामाशयोन्मुखाः ५३ तदास्योद्गारनिश्वासा विड्गंधानुविधायिनः पृथुवृ
त्ततनुस्थूलाः श्यावपीतसितासिताः ते पंच नाम्ना क्रिमयः ककेरुकमकेरुकाः सौ
सुरादा मलूना लेलिहा जनयंति च ५५ विड्भेदशूलविष्टंभकार्श्यपारुष्यपांडु
ताः रोमहर्षाग्निसदनगुदकंडुर्विनिर्गमात् ५६ इत्यष्टांगहृदयनिदाने कुष्ठश्वि
त्रक्रिमिनिदानं अथातो वातव्याधिनिदानं व्याख्यास्यामः सर्वार्थानर्थकरणे वि
श्वस्यास्यैककारणं अरूक्षरूक्षः पवनः शरीरस्य विशेषतः १ स विश्वकर्मा विश्वा
त्मा विश्वरूपः प्रजापतिः स्रष्टा धाता विभुर्विष्णुः संहर्ता मृत्युरंतकः तद्दुष्टौ प्रय
त्नेन यतितव्यमतः सदा तस्यांके दोषविज्ञाने कर्म प्राकृतवैकृतं २ समासव्यासतो

राम
३१

माद्यन्नमांसमेदस्सुचादिशेत् वर्णानिवेद्दगुभयंकुर्यात्तत्रोत्तरोत्तरं ३९
अश्रुस्रक्रोमाबकुलमसंसृष्टंमिथोनवं अनग्निदग्धजंसाध्यमसिद्धंवर्ज्यमतो
न्यथा ४० गुह्यपाणितलौष्ठेषुजातमप्यचिरंतनं स्पर्शैकाहारशय्यादिसे
वनात्प्रायशोगदाः ४१ सर्वसंचारिणोनेत्रत्वग्विकारांविशेषतः कृमयस्तुद्वि
धाप्रोक्ताबाह्याभ्यंतरभेदतः ४२ बहिर्मलकफासृग्विट्जन्मभेदाच्चतुर्विधाः ना
शा६ मतोविंशतिविधाबाह्यास्तत्रमलोद्भवाः ४३ तिलप्रमाणसंस्थानवर्णाःकेशांब
राश्रयाः बहुपादाश्चसूक्ष्माश्चयूकालिक्षाश्चनामतः ४४ द्विधातेकोठपिडिका
कंडूगंडान्प्रकुर्वते कुष्ठैकहेतवोनजीः श्लेष्मजास्तेषुचाधिके ४५ मधुरान्नगुड
क्षीरदधिसक्तुनवौदनैः शाकप्राबहुविट्धान्यपर्णीपूताकोलकादिभिः ४६ कफा
दामाशयेजातावृद्धाःसर्पंतिसर्वतः पृथुवध्नुनिभाकेचित्केचित्गंडूपदोपमाः ४७
रूढधान्यांकुराकारास्तनुदीर्घास्तथाणवः श्वेतास्ताम्रावभासाश्चनामतःसप्तधा
तुते अंत्रादावुदरावेष्टहृदयादामहागुहाः चुरवोदर्भकुसुमाः सुगंधास्तेचकुर्व

वा·
२२

15

[illegible] वातपूर्णदृतिस्पर्शःशोथःसंधिगतोनिलः प्रसारणाकुंचनयो
प्रवर्तिंचसवेदनां" सर्वांगसंश्रयस्तोदभेदस्फुरणभंजनं १४ स्तंभमाक्षे
पणंस्वापंसंध्याकुंचनकंपनं" यदातुधमनीःसर्वाः क्रुद्धोभ्येतिमुहुर्मुहुः १५
तदांगमाक्षिपत्येषव्याधिराक्षेपकःस्मृतः" अधःप्रतिहतोवायुर्व्रजन्नूर्ध्वंहृ
दाश्रयाः १६ नाडीप्रविश्यहृदयंशिरःशंखौचपीडयेत् आक्षिपेत्परितो
गात्रंधनुर्वच्चास्यनामयेत् १७ कृच्छ्रादुच्छ्वसितस्तब्धस्तस्तमीलितदृक्ततः
कपोतइवकूजेच्चनिःसंज्ञःसोपतंत्रकः १८"सएवचापतानाख्योमुक्तेतुमरु
ताहृदिआश्वसीतमुहुःस्वास्थ्यमुहुरस्वास्थ्यमावहेत् १९ गर्भपातसमुत्पन्नः
शोणितातिस्रवोत्थितः अभिघातसमुत्थश्चदुश्चिकित्स्यतमोहिसः २०"म
न्यासंस्तंभ्यवातोंतरायच्छन्धमनीर्यदा व्याप्नोतिसकलंदेहंजत्रुरायाम्यते
तदा २१ अंतर्धनुरिवांगंचवेगैःस्तंभंचनेत्रयोः करोतिजृंभादशनंदशना॥
नांकफोद्वमं २२ पार्श्वयोर्वेदनांवाक्यहनुपृष्ठशिरोग्रहं अंतरायामइत्येष

राम
२२

मांसमेदोगतोग्रंथीन्तोदाढ्यान्कर्कशान्श्रमं गुर्वंगंचातिरुक्स्तब्धंमुष्टिदंडहतोपमं ८

दोषभेदीयेनामधामच प्रत्येकंपंचधाचारोव्यापारैश्चैहवैकृतं ४ तस्याय
तेविभागेनसनिदानंसलक्षणं धातुक्षयकरैर्वायुः कुध्यत्यतिनिषेवितैः ५
चरन्स्रोतस्सुरिक्तेषुभृशंतान्येवपूरयेत्" तेभ्योन्यदोषपूर्णेभ्यः प्राप्यवा।
वरणंबली ६" तत्रपक्वाशयेक्रुद्धः शूलानाहौचकूजनं मलरोधाश्मव।
२५ ध्मार्शस्त्रिकपृष्ठिकटीग्रहं ७ करोत्यधरकायेचतांस्तान्कृच्छ्रानुपद्रवान्"
आमाशयेतृड्वमथुश्वासकासविसूचिकाः ८ कंठोपरोधमुद्गारान्व्याधी
नूर्द्ध्वंचनाभितः" श्रोत्रादिष्विंद्रियवधंत्वचिस्फुटनरूक्षता ९" रक्तेतीव्राहजः
स्वापंतापंरागंविवर्णतां अरूंष्यन्नस्यविष्टंभमरुचिंकृशतांभ्रमं" मुक्रा।
स्पर्शाघ्रमुत्सर्गसंगंविकृतिमेवच तद्वद्गर्भस्यशुक्रस्य" शिरास्वाध्मानरि
क्तते तत्स्थः स्नावस्थितः कुर्याद्गृध्रस्यायामकुब्जतां" अस्थिस्थः सक्थिसं
धास्थिशूलंतीव्रंबलक्षयं मज्जस्थोस्थिषुशौषिर्यमस्वप्नंसततांरुजं"

16

दोषैः पृथग्द्वयैः समागतैः सर्वैष्वपि त्रिदोषेषु व्यपदेशोधिकत्वतः॥ वातेनकुष्ठं
कापालं पित्तादौदुंबरं कफात् मंडलाख्यं विचर्चीच ऋक्षाख्यं वातपित्तजं चर्मैकु।
कुष्ठकिटिभसिध्मालसविपादिकाः वातश्लेष्मोद्भवाः श्लेष्मपित्ताद्दद्रुशतारुषी पुं
डरीकंसविस्फोटं पामा चर्मदलंतथा ९ सर्वैस्यात्काकणंपूर्वंत्रिकं दद्रुसकाक
णं पुंडरीकर्क्षजिह्वेच महाकुष्ठानि सप्ततु १०॥ अतिश्लक्ष्णखरस्पर्शस्वेदास्वेदविवर्ण
ता दाहकंडूःत्वचिस्वापस्तोदःकोठोन्नतिश्रमः व्रणानामधिकंशूलंशीघ्रोत्पत्तिश्चि
रस्थितिः रूढानामपिरूक्षत्वंनिमित्तेल्पेपिकोपनं १२ रोमहर्षोसृजःकार्ष्ण्यंकुष्ठ
लक्षणमग्रजं॥ कृष्णारुणकपालाभंरूक्षंसुप्तंखरंतनु १३ विस्तृतासमपर्यंतंहृ
षितैर्लोमभिश्चितं तोदाढ्यमल्पकंडूकंकापालंशीघ्रसर्पिच १४॥ पक्वोदुंबरता
म्रत्वग्रोमगोरोमशिराचितं बहलंबहलक्लेदरक्तंदाहरुजाधिकं १५ आशूत्थानावद
रणकृमिविद्यादुदुंबरं॥ स्थिरंस्त्यानंगुरुस्निग्धंश्वेतरक्तमनाशुगं १६ अन्योन्यसक्त

18

सर्वजो लक्षणैः सर्वैः सर्वधात्ववसर्पणः॥ बाह्यहेतोः क्षतात्क्रुद्धः सरक्तं पित्तमी
रयन् विसर्पं मारुतः कुर्यात्कुलत्थसदृशैश्चितं स्फोटैः शोफज्वररुजादाहा
ढ्यं श्यावलोहितं॥ पृथग्दोषैस्त्रयः साध्या द्वंद्वजाश्चानुपद्रवाः ६६ असाध्यौ क्ष
तसर्वोत्थौ सर्वे चाक्रांतमर्मकाः शीर्णस्नायुसिरामांसाः प्रक्लिन्नाः शवगंधयः
इति श्रीवाग्भटकृतेष्टांगहृदये निदाने त्रयोदशोध्यायः १३ अथातः कुष्ठ
श्वित्रकृमिनिदानं व्याख्यास्यामः॥ मिथ्याहारविहारेण विशेषेण विरोधिना
साधुनिंदावधान्यस्वहरणाद्यैश्च सेवितैः १ पाप्मभिः कर्मभिः सद्यः प्राक्तनैः प्रे
रिता मलाः शिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषं दूषयंति श्लथीकृत्य
निश्चरं तस्ततो बहिः त्वचः कुर्वंति वैवर्ण्यं दुष्टाः कुष्ठमुशंति तत् २॥ कालेनोपे
क्षितं यस्मात्सर्वं कुष्णाति तद्वपुः प्रपद्य धातून्व्याप्यांतः सर्वान् संक्लेद्य चावहे
त् सस्वेदक्लेदसंकोथान् कृमीन् सूक्ष्मान् सुदारुणान्॥ रोमत्वक्स्नायुधमनीत
रुणास्थीनि यैः क्रमात् भक्षयेच्छ्वित्रमस्माच्च कुष्ठबाह्यमुदाहृतं॥ कुष्ठानि सप्तधा

स्याद्दाहोतिबलस्तथा व्यथनांगेहरेत्संज्ञां निद्रां च श्वासमीरयेत् हिध्मां च सगतो वस्था
मीदृशीं लभते न ना क्वचित्क्ष्मारतिग्रस्तो भूमिशय्यासनादिषु चेष्टमानस्ततः क्लि।
ष्टो मनो देहश्रमोद्भवां ५५ दुःप्रबोधोश्नुते निद्रां सोग्निविसर्प उच्यते" कफेन रुद्धः प
वनो भित्वा तं बहुधा कफं ५६ रक्तं वा वृद्धरक्तस्य त्वक्शिरास्नावमांसगं दूषयित्वा च।
दीर्घाणुवृत्तस्थूलखरात्मनां ५७ ग्रंथीनां कुरुते मालां रक्तानां तीव्ररुक्ज्वरां श्वास
कासातिसारास्यशोषहिध्मावमिभ्रमैः मोहवैवर्ण्यमूर्छांगभंगाग्निसदनैर्युतां इत्य
यं ग्रंथिवीसर्पः कफमारुतकोपजः ५८" कफपित्तात्ज्वरस्तंभो निद्रा तंद्रा शि।
रोरुजा अंगावसादविक्षेपप्रलापारोचकभ्रमाः ६० मूर्छाग्निहानिर्भेदोस्थ्नां पिपा
सेंद्रियगौरवं अस्मोपवेशनं लेपः स्रोतसां सचसर्पति ६१ प्रायेणामाशयं गृह्ण
न्नेकदेशं न चातिरुक् पिटकैरवकीर्णोतिपीतलोहितपांडुरैः ६२ मेचकाभोसित
स्निग्धो मलिनः शोफवान्गुरुः गंभीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नोवदीर्यते पंका।
वच्छीर्णमांसश्च स्पष्टस्नायुशिरागुणः शवगंधिश्च वीसर्पः कर्दमाख्यमुशंतितं ६४"

20

दुरेरितः॥ स्याद्विसर्प्पोभिघातांतैर्दोषैर्दूष्यैश्च शोफवत् अधिष्ठानं च तं प्राहुर्वाह्या
न्तरुभयाश्रयात् ४३ यथोत्तरं च दुःसाध्याः॥ तत्र दोषा यथायथं प्रकोपनैः प्रकुपि
ता विशेषेणा विदाहिभिः ४४ देहे शीघ्रं विसर्प्पंति तेंतरं तःस्थिता वहिः वहिस्थिहि
तेयद्विस्पष्टविघातकं त्वान्तरोश्रयं ४५ मर्म्मोपतापात्संमोहादयनानां घट्टनात् त
ष्णातियोगाद्वेगानां विषमं च प्रवर्त्तनात् ४६ आशु चाग्निबलभ्रंशादतो वाह्यं विप
र्ययात्॥ तत्र वातात्परीसर्प्पो वातज्वरसमव्यथः ४७ शोफस्फुरणनिस्तोदभेदा
यामार्त्तिहर्षवान्॥ पित्ताद्द्रुतगतिः पित्तज्वरलिंगोतिलोहितः ४८॥ कफात्कंडूयुतः
स्निग्धः कफज्वरसमानरुक्॥ स्वदोषलिंगैश्चीयंते सर्व्वे स्फोटैरुपेक्षिताः ४९
॥ ते पक्वभिन्नाः स्वंस्वं च विभ्रति व्रणलक्षणं॥ वातपित्तात् ज्वरच्छर्दिमूर्छातीसारतृड्भ्र
मैः ५० अस्थिभेदाग्निसदनतमकारोचकैर्युतः करोति सर्व्वमंगं च दीप्तांगारावा
कीर्णवत् यंयं देशं विसर्प्पश्च विसर्प्पति भवेत्समः शांतांगारासितो नीलो रक्तो
वाशु च चीयते ५१ अग्निदग्धइव स्फोटैः शीघ्रगत्वाद्द्रुतं च सः मर्मानुसारी वीसर्प्पः

वि४

२७

कृचसर्षपालिप्तवतस्मिंश्चिमिचिमायते २२ ॥ पीतरक्तासिताभासः पित्तादाताम्र
रोमकृत् शीघ्रानुसारप्रशमोमध्येप्राकजायतेतनुः २३ सतृट्दाहज्वरस्वेद
दवक्लेदमदभ्रमः शीतामिलाषीविड्भेदीगंधीस्पर्शासहोमृदुः २४ ॥ कंडुमान्पां
डुरोमत्वक्कठिनःशीतलोगुरुः स्निग्धःश्लक्ष्णःस्थिरस्त्यानोनिद्राछर्द्यग्निसादकृ
त् २५ आक्रांतोनोन्नमेत्कृच्छ्रशमजन्मानिशाबलः श्रवेन्नासृक्चिरात्पिच्छांकुश
शस्त्रादिविक्षतः स्पर्शोष्णकांक्षीचकफात् ॥ यथास्वंद्वंद्वजास्त्रयः ॥ संकराद्धेतु।
लिंगानांनिचयान्निचयात्मकः ॥ अभिघातेनशस्त्रादिच्छेदभेदक्षतादिभिः हि
मानिलोदध्यनिलैर्भल्लातकपिकच्छुजै रसैःशूकैश्चसंस्पर्शाच्छ्वयथुःस्याद्वि
सर्प्यवात् भृशोष्मालोहिताभासःप्रायशःपित्तलक्षणः ॥ विषजःसविषप्रा
णिपरिसर्प्पणमूत्रणात् दंष्ट्रादंतनखापातादविषप्राणिनामपिविण्मूत्रशुक्रो
पहतमलवद्वस्त्रसंकरात् विषवृक्षानिलस्पर्शाद्गरयोगावचूर्णनात्
मृदुश्चलोवलंबीचशीघ्रोदाहरुजाकरः ॥ नवोनुपद्रवःशोफःसाध्योसाध्यः

स्तस्याश्रयं २१ उत्सेधं संहतं शोफं तमाहुर्निचयादतः सर्वं हेतु विशेषैस्तु रूपमे
दान्नवात्मकं २२ दोषैः पृथक्द्वयैः सर्वैरभिघाताद्विषादपि द्विधा वा निजमागं
तु सर्वांगैकांगजं च तं पृथून्नतग्रथितत्वविशेषैस्त्रिधा विदुः सामान्यं हेतुः
शोफानां दोषजानां विशेषतः २४ व्याधिकर्मोपवासादि क्षीणस्य भजतेर्द्रुतं
अतिमात्रमथान्यस्य गुर्वम्लस्निग्धशीतलं २५ लवणक्षारतीक्ष्णोष्णशा
कांबुस्वप्नजागरं मद्वाम्पमांसवल्लूरमजीर्णश्रममैथुनं २६ पदातेर्मार्गगम
नं यानेन क्षोभिणापि वा श्वासकासातिसारार्शोजठरप्रदरज्वराः २७ विषूच्या
लसकछर्दिगर्भवीसर्पपांडुता अन्ये च मिथ्योपक्रांता स्तैर्दोषा वक्षसि स्थि
ताः उर्द्ध्वं शोफमधो वस्तौ मध्ये कुर्वंति मध्यगाः सर्वांगगाः सर्वगतं प्रत्यंगेषु त
दाश्रयाः २९ तत्पूर्वरूपं दवथुः शिरायामोंगगौरवं वातान्छोथश्चलो रूक्षः
खररोमा रूणासितः संकोचस्पंदहर्षार्तितोदभेदप्रसुप्तिमान् क्षिप्रोत्थानशमः
शीघ्रमुन्नमेत्पीडितस्तनुः स्निग्धोष्णमर्द्दनैः शाम्यद्रात्रावल्पो दिवा महान् त्वा

कृता ४ वर्चोभेदाम्लकोदाहः" कफात्शुक्लसिरादिता तंद्रालवणवक्त्रत्वंरोम
हर्षःस्वरक्षयः ५ कासःछर्दिश्चनिचयान्मिश्रलिंगोतिदुःसहः" मृत्कषाया
निलंपित्तमूषरामधुराकफं दूषयित्वारसादींश्चरौक्षाद्भुक्तंविरूक्षपचश्रो
तांस्यपक्वैवापूर्यकुर्याद्बुद्ध्वाचपूर्ववत् पांडुरोगंततःशूननाभिपादास्य
मेहिनःपुरीषंकृमियन्मुंचेद्भिन्नंसासृक्कफंनरः १३" यःपांडुरोगीसेवेतपित्त
लंतस्यकामलां कोष्ठशाखाश्रयापित्तंदग्ध्वासृग्मांसमावहेत् हारिद्रनेत्र
मूत्रत्वग्नखवक्त्राशकृत्तया १५ दाहविपाकतृष्णावान्भेकाभोदुर्बलेंद्रियः
भवेत्पित्तोल्बणोस्यासौपांडुरोगाहतेपिच" उपेक्षयाचशोफाढ्यासाकृच्छ्राकुंभ
कामला" हरितश्यावपीतत्वंपांडुरोगेयदाभवेत् १८ वातपित्ताद्भ्रमस्तृष्णा
स्त्रीष्वहर्षोमृदुज्वरः तंद्राबलानलभ्रंशोलोढरंतेहलीमकं १९ अलसंचे
तिषांसंतितेषांपूर्वमुपद्रवाः शोफप्रधानाःकथितास्तएवातोनिगद्यते २०"
पित्तरक्तकफान्वायुर्दुष्टोदुष्टान्वहिःसिराः नीत्वारुद्धगतिस्तैर्हिकुर्यात्त्वग्मां

वलिनाशिथिल्यंपित्तंहृदिस्थितं १ धमनीर्दशासंप्राप्यव्याप्नुवन्सकलांतनुं।
श्लेष्मत्वग्रक्तमांसानिप्रदूष्यांतरमाश्रितं २ त्वग्मांसयोस्तत्कुरुतेत्वचिवा
र्णान्पृथग्विधान् पांडुहारिद्रहरितान्पांडुत्वंतेनचाधिकं यतोतःपां
डुरित्युक्तःसरोगःतेनगौरवं धातूनांस्याच्चशैथिल्यमोजसश्चगुणक्षयः
ततोल्परक्तमेदस्कोनिःसारःस्याच्छिथिलेंद्रियः मृद्यमानैरिवांगैर्नाद्रवताहृ
दयेनच ५ शूनाक्षिकूटःसदनःकोपनःष्ठीवनोल्पवाक अन्नद्विट्शिशिर
द्वेषीशीर्णरोमाहतानलः ६ सन्नसक्थोज्वरीश्वासीकर्णक्ष्वेडीभ्रमीश्रमी
सपंचधापृथक्दोषैःसमस्तैर्मृत्तिकादनात् ७ प्राग्रूपमस्यहृदयस्पंद
नंरूक्षतात्वचि अरुचिःपीतमूत्रत्वंस्वेदाभावोल्पवह्निता ८ सादःश्र
मोनिलात्तत्रगात्ररुक्तोदकंपनं कृष्णरूक्षारुणशिरानखविण्मूत्रने
त्रता ९ शोफानाहास्यवैरस्यविट्शोषाःपार्श्वमूर्द्धरुक् पित्ताद्धरित
पीताभसिरादित्वंज्वरस्तमः १० तट्स्वेदमूर्छाशीतेच्छादौर्गंध्यंकटुव

२५

स्रागुदस्रुतिरुजाद्युतं श्वासकासतृडन्वितं नानावर्णसिराततं तोय
पूर्णदृतिस्पर्शशब्दप्रक्षोभवेपथुः दकोदरं महत्स्निग्धं स्थिरमावृत्तना
भितत्॥ उपेक्षया च सर्व्वे स्युर्दोषाः स्वस्थानतश्च्युताः पाकाद्द्रवाद्द्रवीकु
र्युः संधिस्रोतोमुखान्यपि स्वेदश्च बाह्यस्रोतस्सु विहतस्तिर्यगास्थितः
तदेवोदकमाप्याय्य पिछां कुर्यात्तदा भवेत् गुरूदरं स्थिरं वृत्तमाहतं च न
शब्दवत् मृदुव्यपेतराजीकं नाभ्यां स्पर्शं च सर्प्पति तदनूदकजन्मा
स्मिन् कुक्षिवृद्धिस्ततोधिकं सिरांतर्द्धानमुदकं जठरोक्तं च लक्षणं॥ वा
तपित्तकफप्लीहसन्निपातोदकोदरं कष्टं यथोत्तरं पक्षात्परं प्रायोपरे
हतः सर्व्वं च जातसलिलं रिष्टोक्तोपद्रवान्वितं जन्मनैवोदरं सर्व्वं प्रायः
कृच्छ्रतमं मतं बलिनस्तदजातांबु यत्नसाध्यं नवोत्थितं इत्युदररोगहूद
यनिदाने द्वादशोध्यायः १२ अथातः पांडुरोगशोफविसर्प्पनिदानं व्या
ख्यास्यामः पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः तत्रानिलेन

२२

25

बाल्लैःसहान्नेनभुक्तैर्बद्धायनेगुदे दुर्न्नामभिस्तदावर्त्तैरन्यैर्वान्त्रोपलेपि।
भिः वर्च्चःपित्तकफान्रुद्ध्वाकरोतिकुपितोनिलः अपानोजठरंतेनस्यु
र्दाहज्वरतृट्क्षवाः कासश्वासोरुसदनंशिरोहृन्नाभिपायुरुक् मलसं
गोरुचिश्छर्दिरुदरंमूढमारुतं स्थिरंनीलारुणशिराराजिनद्धमराजिवा
नाभेरुपरिचप्रायोगोपुच्छाकृतिजायते॥ अस्थ्यादिशल्यैःसान्नैर्भुक्तैर
त्यशनेनवा भिद्यतेपच्यतेचान्त्रंतच्छिद्रैश्चस्रवन् बहिः आमएवगु
दादेतिततोल्पाल्पंसविड्रसः तुल्यःकुणपगंधेनपिच्छिलःपीतलो।
हितः शेषश्चापूर्यजठरंजठरंघोरमावहेत् वर्द्धतेतदधोनाभेराशुचै।
तिजलात्मतां उद्रिक्तदोषरूपंचव्याप्तंचश्वासतृड्भ्रमैः छिद्रोदरमिदं
प्राहुःपरिस्रावीतिचापरे॥ प्रवृत्तस्नेहपानादेःसहसामाम्बुपायिनः अत्यं
बुपानान्मंदाग्नेःक्षीणस्यातिकृशस्यवा रुद्ध्वाम्बुमार्गाननिलःकफश्च
जलमूर्छितः वर्द्धयेतांतदेवाम्बुतत्स्थानादुदराश्रितौ ततःस्यादुदरंत

27

२४

मुक्तात्वगादिता १८ उदरं स्तिमितं स्निग्धं शुक्लराजीततं महत् चिराभि
वृद्धिकठिनं शीतस्पर्शं गुरु स्थिरं १९ त्रिदोषकोपनैस्तैस्तैः स्त्रीदत्तैश्च रजो
मलैः गरदूषीविषाद्यैश्च सरक्ताः संचिता मलाः २० कोष्ठं प्राप्य विकुर्वाणाः
शोषमूर्छाभ्रमान्वितं कुर्युस्त्रिलिंगमुदरं शीघ्रपाकं सुदारुणं २१ बाधते
तच्च सुतरां शीतवाताभ्रदर्शने अत्याशितस्य संक्षोभात्स्थानयानाति
चेष्टितैः २२ अतिव्यवायकर्माध्ववमनव्याधिकर्शनैः वामपार्श्वाश्रितः
प्लीहा च्युतः स्थानाद्विवर्द्धते २२ शोणितं वा रसादिभ्यो विवृद्धं तं विवर्द्धये
त् सोष्ठीलेवातिकठिनः प्राकृतः कूर्मपृष्ठवत् २४ क्रमेण वर्द्धमानश्च
कुक्षावुदरमावहेत् श्वासकासपिपासास्यवैरस्याध्मानरुग्ज्वरैः २५
पांडुत्वमूर्छाछर्दिदाहमोहैश्च संयुतं अरुणाभं विवर्णं वा नीलहारिद्रराजि
मत् २६ उदावर्त्तरुगानाहैर्मोहतृड्दहनज्वरैः गौरवारुचिकाठिन्यैश्च वि
द्यात्तत्र मलान् क्रमात् प्लीहवद्दक्षिणात्पार्श्वात्कुर्याद्यकृदपि च्युतं पक्ष

२८

राम
२४

चिच्छोफश्च पादयोः रुग्वस्तिसंधौ ततता लघ्वल्पभोजनैरपि ७ राजीजन्म
वलीनाशो जठरे जठरेषु तु सर्वेषु तंद्रा सदनं मलसंगोल्पवह्निता ८ दा
लर हः श्वयथुराध्मानमंते सलिलसंभवः सर्वं त्वतोयमरुणमशोफं नातिभारकं ९
गवाक्षितं शिराजालैः सदा गुडगुडायते नाभिमंत्रं च विष्टभ्य वेगं कृत्वा प्र
णश्यति १० मारुतो हृत्कटिनाभिवायुवंक्षणवेदना सशब्दो निश्चरेद्वायुर्वि
ड्बद्धो मूत्रमल्पकं ११ नातिमंदोनलो लौल्यं नच स्याद्विरसं मुखं तत्र वा
तोदरे शोफः पाणिपान्मुष्ककुक्षिषु १२ कुक्षिपार्श्वोदरकटीपृष्ठरुक्पर्वभे
दनं मुष्ककासोंगमर्दोधोगुरुतामलसंग्रहः १३ श्यावारुणत्वगादित्वमक
स्माद्वृद्धिह्रासवत् सतोदभेदमुदरं तनुकृष्णसिराततं १४ आध्मानदृतिव
च्छब्दमाहतं प्रकरोति च वायुश्चात्र सरुक्शब्दो विचरेत्सर्वतो गतिः १५
पित्तोदरे ज्वरो मूर्छा दाहस्तृट्कटुकास्यता यति मृदुस्पर्शं क्षिप्रपाकं प्रदूय
ते १७ श्लेष्मोदरेंगसदनं स्वापश्वयथुगौरवं निद्रोत्क्लेशोरुचिः श्वासः कासः

भ्रमोतिसारः पीतत्वं त्वगादावुदरं हरित् १६ पीतता
म्रशिरानद्धं सस्वेदं सोष्म दह्यते धूमाय

२३

लोर्द्धं समुन्नतः आनाहलिंगी तिर्यक्क प्रत्यष्ठीलातदाकृतिः ६१ पक्वाशयाद्दु
दोषस्य वायुस्तीव्ररुजः प्रयात् तूनीप्रतूनीचभवेत्सएवातोविपर्यये ६२
उद्गारबाहुल्यपुरीषबंधतृ[illegible] क्षमत्वांत्रविकूजनानि आटोपमाध्मानमप
क्तिशक्तिमासन्नगुल्मस्यवदंतिचिह्नं ६३ इतिश्रीवाग्भटकृतेऽष्टांगहृदयेनि
दानस्थानेएकादशोध्यायः अथातउदरनिदानंव्याख्यास्यामः रोगाःसर्वेपि
नं६ मंदेग्नौसुतरामुदराणितु अजीर्णान्मलिनैश्चान्नैर्जायंतेमलसंचयात् १ ऊर्द्धा
धोधातवोरुद्ध्वावाहिनीरंबुवाहिनीः प्राणाग्न्यपानान्संदूष्यकुर्युस्त्वग्मांससं
धिगाः २ आध्माप्यकुक्षिमुदरमष्टधातच्चभिद्यते पृथग्दोषैःसमस्तैश्चप्लीहब
द्धक्षतोदकैः ३ तेनार्त्ताःशुष्कताल्वोष्ठाःशूनपादकरोदराः नष्टचेष्टाबला
हाराःकृशाःप्रध्मातकुक्षयः ४ स्युःप्रेतरूपापुरुषाःभाविनस्तस्यलक्षणं क्षु
न्नाशोन्नंचिरात्सर्वंसविदाहंचपच्यते ५ जीर्णाजीर्णंनजानातिसौहित्यंसहते
नच क्षीयतेबलतःशश्वच्छ्वसत्य[illegible]ल्पेपिचेष्टते ६ वृद्धिर्विशोप्रवृत्तिश्चकिं

राम
२३

रुणाद्यार्त्तवं योन्यां प्रतिमासमवस्थितं ५० कुक्षिं करोति तद्गर्भलिंगमाविः करोति
च हृल्लासदौहृदस्तन्यदर्शनक्षाममतादिकं ५१ क्रमेणावायुसंसर्गात्पित्तयोनि
तयाचतत् शोणितं कुरुते तस्या वातपित्तोत्थगुल्मजान् ५२ रुक्स्तंभदाहाती
सारतृट्ज्वरादीनुपद्रवान् गर्भाशयेच सुतरां शूलं दुष्टासृगाश्रये ५२ योन्या
श्चस्रावदौर्गंध्यतोदस्पंदनवेदनाः नचांगैर्गर्भवद्गुल्मः स्फुरत्यपितु शूलवा
न् ५४ पिंडीभूतः सएवस्याःकदाचित्स्पंदतेचिरात् नचास्यावर्द्धतेकुक्षिर्गुल्म
एवतुवर्द्धते ५५ स्वदोषसंश्रयोगुल्मः सर्वोभवतितेनसः पाकंचिरेणभजते
नैववाविद्रधिःपुनः ५६ पच्यतेशीघ्रमत्यर्थंदुष्टरक्ताश्रयत्वतः अतःशीघ्रविदा
हित्वाद्विद्रधिःसोभिधीयते ५७ गुल्मेंतराश्रयेवस्तिकुक्षिहृत्प्लीहवेदना अग्नि
वर्णःबलभ्रंशोवेगानांचाप्रवर्त्तनं ५८ अतोविपर्ययोबाह्येकोष्ठांगेषुतुनातिरु
क् वैवर्ण्यमवकाशस्यबहिरुन्नततनाधिकं ५९ साटोपमत्युग्ररुजमाध्मानमु
दरेभृशं ऊर्ध्वाधोवातरोधेनतमानाहंप्रचक्षते ६० घनष्ठीलोपमोग्रंथिरष्ठी

२२

तंत्रः स्वाश्रयेदुष्टः परतंत्रः पराश्रये पिंडितत्वादमूर्तत्वमिवसंश्रिते ४० गुल्मइत्यु
च्यते वस्तिनाभिहृत्पार्श्वसंश्रयः" वातान्मन्याशिरःशूलज्वरप्लीहांत्रकूजनं ४१ व्य
धः सूक्ष्मैव विट्संगः कृच्छ्रादुच्छ्वसनं मुहुः स्तंभो गात्रे मुखे शोषः कार्श्यं विषमवा
ह्निता ४२ रूक्षकृष्णत्वगादित्वं चलत्वादनिलस्य च अनिरूपितसंस्थानस्था
नवृद्धिक्षयव्यथः ४३ पिपीलिकाव्याप्तइव गुल्मः स्फुरति तुद्यते" पित्ताद्दाहोऽम्ला
कोमूर्छाविड्भेदस्वेदतृड्ज्वराः ४४ हारिद्रत्वं त्वगाद्येषु गुल्मश्च स्पर्शनासह
दूयते दीप्यते सोष्मा स्वस्थानं दहतीव च ४५" कफात्स्तैमित्यमरुचिः सदनं शि
शिरज्वरः पीनसालस्यहृल्लासकासशुक्लत्वगादिता ४६ गुल्मोऽवगाढः कठि
नो गुरुः सुप्तः स्थिरोऽल्परुक्" स्वदोषस्थानधामानस्ते स्वकाले च रुक्कराः ४७
प्रायः स्वयषुद्वंद्वोत्था गुल्माः संसृष्टलक्षणाः" सर्वजस्तीव्ररुग्दाहः शीघ्रपाकी
घनोन्नतः ४८ सोऽसाध्यो" रक्तगुल्मस्तु स्त्रिया एव प्रजायते ऋतौ वा नवसूता
वा यदि वा योनिरोगिणी ४९ सेवते वातलानि स्त्री कुहस्तस्यां समीरणः नि

क्षणसंधिस्थोग्रंथ्याभःश्वयथुस्तदा उपेक्षमाणस्यचमुष्कवृद्धिमाध्मानरुक्स्तंभ
वतींसवायुः प्रपीडितोंतःस्वनवान्प्रयातिप्रध्मापयन्नेतिपुनश्चमुक्तः अंत्रव

इत्यंत्रवृद्धिनिदानं गुल्मनिदानं

द्धिरसाध्योयंवातवृद्धिसमाकृतिः ३१ रूक्षकृष्णारुणसिरातंतुजालगवा
क्षितः गुल्मोष्टधापृथग्दोषैःसंसृष्टैर्निचयंगतैः २२ आर्त्तवस्यचदोषेण
नारीणांजायतेष्टमः ज्वरछर्द्यतिसाराद्यैर्वमनाद्यैश्चकर्मभिः ३३ कर्षितोवा
तलान्यत्तिशीतंवांबुबुभुक्षितः यःपिबत्यनुचान्नानिलंघनप्लावनादिकं ३४
सेवतेदेहसंक्षोभिछर्दिंवासमुदीरयेत् अनुदीर्णामुदीर्णान्वावातादीन्नविमु
चति २५ स्नेहस्वेदावनभ्यस्यशोधनंवानिषेवते शुद्धोवाशुविदाहीनिभज
तेस्यंदनानिवा ३६ वाताद्यास्तस्यमलाःपृथक्क्रुद्धाद्विशोथवा सर्वेवा
रक्तयुक्तावामहास्रोतोनुशायिनः २७ ऊर्द्ध्वाधोमार्गमावृत्यकुर्वतेशूलपू
र्वकं स्पर्शोपलभ्यंगुल्माख्यमुत्प्लुतंग्रंथिरूपिणं ३८ कर्षणात्कफविट्पित्तै
र्मार्गस्यावरणेनवा वायुःकृताश्रयःकोष्टेरौक्ष्यात्काठिन्यमागतः २९ स्व

स्याभिन्नानां निर्दहेदिव वा॥१८॥ पक्वश्चांतः स्रवत्यक्षात् क्षीणस्योपद्रवान्वितः॥ एवा
मेव स्तनशिराविवृताः प्राप्य योषितां १९ सूतानां गर्भिणीनां वा संभवेत्क्षयथु
र्घनः स्तने सदुग्धे दुग्धे वा बाह्यविद्रधिलक्षणः २० नाडीनां सूक्ष्मवक्त्रत्वात्क
इति विद्रधिनिदानं अथ वृद्धिनिदानं
न्यानां न स जायते॥ क्रुद्धोर्द्ध्वगतिर्वायुः शोफशूलकरश्चरन् २१ मुष्कौ वंक्षण
तः प्राप्य फलकोशाभिवाहिनीः प्रपीड्य धमनीर्वृद्धिं करोति फलकोशयोः २२
॥दोषास्रमेदोमूत्रांत्रैः स वृद्धिः सप्तधा गदः मूत्रांत्रजावप्यनिलाद्धेतुभेदस्तु के
वलं २२॥ वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक्॥ पक्वोदुंबरसंकाशः पित्ता
द्दाहोष्मपाकवान् २४॥ कफाच्छीतो गुरुः स्निग्धः कंडूमान्कठिनोल्परुक्॥ कृष्ण
स्फोटावृतः पित्तवृद्धिलिंगश्च रक्ततः २५॥ कफवन्मेदसा वृद्धिर्मृदुस्तालफलो
पमः॥ मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः २६ अंभोभिः पूर्णदृतिवत्क्षोभं
याति सरुङ्मृदुः मूत्रकृच्छ्रमधस्ताच्च वलयं फलकोशयोः २७॥ वातकोपिभि
राहारैः क्षुद्रांत्रावयवं यदा पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् २९ कुर्याद्वृ

शीततोयावगाहिभिः धारणेरणभाराध्वविषमांगप्रवर्तनैः २८ क्षोभणैः क्षुभितोन्यैश्च

क्षिप्रोत्थानप्रपाकश्च पांडुः कंडूयुतः कफात् सोत्क्लेशशीतकस्तंभजृंभारोचकगौर
वः ८ चिरोत्थानविदाहश्च संकीर्णः सन्निपातजः सामर्थ्याचात्र विभजेद्बाह्याभ्यं
तरलक्षणं ९ कृष्णस्फोटावृतः श्यावस्तीव्रदाहरुजाज्वरः पित्तलिंगोसृजा वा
ह्यः स्त्रीणामेव तथांतरः १० शस्त्राद्यैरभिघातेन क्षते वापथ्यकारिणः क्षतोष्मा
वायुविक्षिप्तः सरक्तं पित्तमीरयन् ११ पित्तासृग्लक्षणं कुर्याद्विद्रधिं भूर्युपद्र
वं तेषूपद्रवभेदश्च स्मृतोधिष्ठानभेदतः १२ नाभ्यां हिध्मा भवेद्बस्तौ मूत्रं कृच्छ्रे
ण पूति च श्वासो यकृति रोधस्तु प्लीह्न्युच्छ्वासस्य तृट् पुनः १३ गलग्रहश्च क्लोम्नि
स्यात्सर्वांगप्रग्रहो हृदि प्रमोहस्तमकः कासो हृदये घट्टनं व्यथा १४ कुक्षिपार्श्वां
तरांसार्तिः कुक्षावाटोपजन्म च सक्थ्नोर्ग्रहो वंक्षणयोर्वृक्कयोः कटिपृष्ठयोः १५
पार्श्वयोश्च व्यथा पायौ पवनस्य निरोधनं आमपक्वविदग्धत्वं तेषां शोफवदा
दिशेत् १६ नाभेरूर्ध्वं मुखात्पक्वाः प्रसरंत्यधरे गुदात् उभाभ्यां नाभिजो विद्याद्दोषं
क्लेदाच्च विद्रधौ १७ यथास्वं व्रणवत्तत्र विवर्ज्यः सन्निपातजः पक्वो हृन्नाभिवस्ति

35

२

ढरुजाक्लेदापृष्ठेवाजठरेपिवा २९ महतीपिडिकानीलाविनिताविनितास्मृ
ता दहतित्वचमुत्थानेभृशंकष्टाविसर्पिणी ३० रक्तान्तस्मातितृट्स्फोटदाह
मोहज्वरालजी मानसंस्थानयोस्तुल्यामसूरेणमसूरिका ३१ सर्षपामानसं
स्थानाल्पिप्रपाकामहारुजा सर्षपीसर्षपातुल्यपिडिकापरिवारिता ३२ पुत्रि
णीमहतीमल्पैःसुसूक्ष्मपिटिकावृता विदारीकंदवद्वृत्ताकठिनाचविदारिका ३३
विद्रधीर्वक्ष्यतेन्यत्रतत्राणीपिटिकात्रयं पुत्रिणीचविदारीचदुःसहाबहुमेदसः
सह्याःपित्तोल्वणास्त्वन्याःसंभवंत्यल्पमेदसः तासुमेहवशाच्चरूपादोषोद्रेको
यथायथं ३५ प्रमेहेणविनाप्येताजायंतेदुष्टमेदसः तावच्चनोपलक्ष्यंतेया
वद्वस्तुपरिग्रहः ३६ हारिद्रवर्णोरक्तोवामेहप्राग्रूपवर्जितं योमूत्रयेन्नतंमेहंर
क्तपित्तंतुतद्विदुः ३७ स्वेदोंगगंधःशिथिलत्वमंगशय्यासनस्वप्नसुखाभिषंगः
हृन्नेत्रजिह्वाश्रवणोपदेहघनांगताकेशनखातिवृद्धिः शीतप्रियत्वंगलतालु
शोषोमाधुर्यमास्येकरपाददाहः भविष्यतोमेहगणस्यरूपंमूत्रेभिधावंतिपि

पीलिकाश्च हृष्टाप्रमेहं मधुरं सपिच्छं मधूपमस्याद्द्विविधोविचारः संतर्प्पणाद्वा
कफसंभवः स्यात् क्षीणेषु दोषेष्वनिलात्मकोवा सपूर्वरूपाः कफपित्तमेहाः क्र
मेणयेवातकृताश्चमेहा साध्यानतेपित्तकृतास्तुयाप्याः साध्यास्तुमेदोयदि
नातिदुष्टं इतिदशमोध्यायः १० अथातोविद्रधिवृद्धिगुल्मनिदानंव्याख्यास्या
मः भुक्तैः पर्युषितात्युष्णरूक्षशुष्कविदाहिभिः जिह्मशय्याविचेष्टाभिस्तैस्तै
श्चासृक्प्रदूषणैः दुष्टत्वग्मांसमेदोस्थिस्नायवसृक्कंडराश्रयः यः शोफोवहि
रंतर्वामहामूलोमहारुजः २ वृत्तः स्यादायतोयोवास्मृतः षोढासविद्रधिः दो
षैः पृथक् समुदितैः शोणितेनक्षतेनच ३ वाह्योत्रतत्रांगदाहतेणग्रथि
तोन्नतः अंतरोदारुणतरोगंभीरोगुल्मवद्घनः ४ (वल्मी)कवत्समुच्छ्रायीशीघ्रघात्यग्नि
शस्त्रवत् नाभिवस्तिकृक्षिप्लीहक्लोमहृत्कुक्षिवंक्षणे स्याद्वृक्कयोरपानेच वाता
त्तत्रातितीव्ररुक् श्यावारुणश्चिरोत्थानपाकोविषमसंस्थितः व्यधच्छेदभ्रमा
नाहस्पंदसर्प्पणशब्दवान् रक्तताम्रासितः पित्तात्तृण्मोहज्वरदाहवान् ७ ॥

37

१९

वहत्तिमेहीप्रमेहति १७ मधुमेहोमधुसमंजायतेसकिलद्विधा क्रुद्धेधातुक्षया
द्वायौदोषावृतपथेथवा १८ आवृतोदोषलिंगानिसोनिमित्तंप्रदर्शयन् क्षीणः
क्षणात्क्षणात्पूर्णोभजतेकृच्छ्रसाध्यतां १९ कालेनोपेक्षिताःसर्वेयांतिमधु
मेहतांमधुरंयच्चसर्वेषुप्रायोमाध्वेवमेहति २० सर्वेपिमधुमेहाख्यामाधुर्याच्चत
नोरतः अविपाकोरुचिश्छर्दिर्निद्राकासःसपीनसः २१ उपद्रवाःप्रजायंतेमेहानां
कफजन्मनां वस्तिमेहनयोस्तोदोमुष्कावदरणंज्वरः २२ दाहस्तृष्णाम्लकोमू
र्छाविड्भेदःपित्तजन्मनां वातकानामुदावर्तकंपहृद्ग्रहलोलताः २३ शूलमुन्नि
द्रताशोषःकासश्वासश्चजायते शराविकाकच्छपिकाजालिनीविनतालजी २४
मसूरिकासर्षपिकापुत्रिणीसविदारिका विद्रधिश्चेतिपिडकाप्रमेहोपेक्षयादश २५
संधिमर्मसुजायंतेमांसलेषुचधामसु अंतोन्नतामध्यनिम्नाश्यावाक्लेदरुजान्वि
ताः २६ शरावमानसंस्थानापिडकास्याच्छराविका अवगाढार्तिनिस्तोदामहावस्तु
परिग्रहा २७ श्लक्ष्णाकच्छपपृष्ठाभापिडकाकच्छपीमता स्तब्धाशिराजालवती
स्निग्धस्रावामहाशया २८ रुजानिस्तोदबहुलासूक्ष्मछिद्राचजालिनी अवगा

राम
१९

तयामहात्ययपतयापिच ७ सामान्यलक्षणंतेषांप्रभूताविलमूत्रता॥ दोष
दूष्याविशेषेपितत्संयोगविशेषतः ८ मूत्रवर्णादिभेदेनभेदोमेहेषुकल्पते॥
अच्छंबहुसितंशीतंनिर्गंधमुदकोपमं मेहत्युदकमेहेनकिंचिच्चाविलपिच्छि
लं॥ इक्षोरसमिवात्यर्थंमधुरंचेक्षुमेहतः ९॥ सांद्रीभवेत्पर्युषितंसांद्रमेही
प्रमेहति॥ सुरामेहीसुरातुल्यमुपर्यच्छमधोघनं १०॥ संहृष्टरोमापिष्टेनपिष्ट
बहुलंसितं॥ शुक्राभंशुक्रमिश्रंवाशुक्रमेहीप्रमेहति ११॥ मूत्राणूनसिकता
मेहीसिकतारूपिणोमलान्॥ शीतमेहीसुबहुशोमधुरंभृशशीतलं १२॥ शनैः
शनैःशनैर्मेहीमंदंमंदंप्रमेहति॥ लालातंतुयुतंमूत्रंलालामेहेनपिच्छिलं १३
गंधवर्णरसस्पर्शैःक्षारेणक्षारतोयवत्॥ नीलमेहेननीलाभंकालमेहीमषी
निभं॥ १४ हारिद्रमेहीकटुकंहरिद्रासन्निभंदहत्॥ विस्रंमांजिष्ठमेहेनमंजिष्ठास
ललोपमं १५॥ वसामेहीवसामिश्रंवसांवामूत्रयेन्मुहुः॥ मज्जानंमज्जमिश्रंवा
मज्जमेहीमुहुर्मुहुः १६ हस्तीमत्तइवाजस्रंमूत्रंवेगविवर्जितं सलसीकंविबद्धं।

१८

नःकृच्छ्राद्दुष्टवातंवदंतितं ॥ २६ ॥ रूक्षस्यक्लांतदेहस्य वस्तिस्थौपित्तमारुतौ मूत्र
क्षयंसरुग्दाहंजनयेतांनदाहयं २७ ॥ पित्तंकफोद्वावपिवासंहन्येतेनिलेनचे।
त् कृच्छ्रान्मूत्रंतदापीतंरक्तंश्वेतंघनंसृजेत् २८ सदाहंरोचनाशंखचूर्णवर्णंभ
वेच्चतत् शुष्कंसमस्तवर्णंवामूत्रसादंवदंतितं ॥ २९ इतिविस्तरतःप्रोक्तारो
गामूत्राप्रवर्तिजाः निदानलक्षणैरूर्द्धवक्ष्यंतेतिप्रवर्त्तिजा ३० इत्यष्टांगहृद।
यनिदानेनवमोध्यायः अथातःप्रमेहनिदानंव्याख्यामः प्रमेहाविंशतिस्तत्र
श्लेष्मतोदशपित्ततः षट्चत्वारोनिलात्तेषांमेदोमूत्रकफावहं १ अन्नपान
क्रियाजातंयत्प्रायस्तत्प्रवर्त्तकं स्वाद्वम्ललवणस्निग्धगुरुपिच्छलशीतलं २
नवधान्यसुरानूपमांसेक्षुगुडगोरसं एकस्थानासनरतिःशयनंविधिवर्ज
तं ३ वस्तिमाश्रित्यकुरुतेप्रमेहान्दूषितःकफः दूषयित्वावपुःक्लेदस्वेदमे
दोरसामिषं ॥ पित्तंरक्तमपिक्षीणेकफादौमूत्रसंश्रयं धातून्वस्तिमुपानीयतत्
क्षयेपिचमारुतः ५ ॥ साध्ययाप्यपरित्याज्यामेहास्तेनैवतद्भवाः ॥ समासमक्रिय

स्तंभो हृद्गौरवः २५ मूत्रमल्पाल्पमथवा विमुंचति शकृत्सृजन् वातकुंडलिकां त्येषां मूत्रं तु विधृतं चिरं २६ न निरेति विबद्धं वा मूत्रातीतं तदल्परुक् विधारणात् प्रतिहतं वातोदावर्तितं यदा २७ नाभेरधस्तादुदरं मूत्रमापूरयेत्तदा कुर्यात्तीव्ररुगाध्मानमपक्तिं मलसंग्रहं २८ तन्मूत्रजठरं विद्याद्वैगुण्येनानिलेन वा ॥ आदिश्य मल्पमूत्रं च वस्तौ नालेऽथवा मणौ २९ स्थित्वा स्रवेच्छनैः पश्चात्सरुजं वाथवा रुजं मूत्रोत्संगः स विछिन्नतच्छेषगुरुशेफसः ३० अंतर्वस्तिमुखे वृत्तः स्थिरोल्पः सहसा भवेत् अश्मरीतुल्यरुग्ग्रंथिर्मूत्रग्रंथिः स उच्यते ३१ मूत्रितस्य स्त्रियं यातो वायुना शुक्रमुद्धतं स्थानाच्युतं मूत्रयतः प्राक्पश्चाद्वा प्रवर्तते ३२ भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्यते रूक्षदुर्बलयोर्वातादुदावर्तं शकृद्यदा ३३ मूत्रस्रोतोनुपर्येति संसृष्टं शकृता तदा मूत्रं विट्तुल्यगंधं स्याद्विड्विघातं तमादिशेत् ३४ पित्तं व्यायामतीक्ष्णोष्णभोजनाध्वातपादिभिः प्रवृद्धं वायुना क्षिप्तं वस्तुपस्थान्निदाहवत् ३५ मूत्रं प्रवर्तयेत्पीतं सरक्तं रक्तमेव वा उष्णं पुनः पु

१०

मधुवर्णायवासिता १४ एताभवंतिबालानांतेषामेवचभूयसा आश्रयोपचया
ल्पत्वाद्ग्रहणाहरणेसुखाः १५ शुक्राश्मरीतुमहतांजायतेशुक्रधारणात् स्थाना।
च्युतमयुक्तंहि मुष्कयोरंतरेनिलः १६ शोषयत्युपसंगृह्यशुक्रंतच्छुक्रमश्मरी
वस्तिरुक्कृच्छ्रमूत्रत्वमुष्कश्वयथुकारिणी १७ तस्यामुत्पन्नमात्रायांशुक्रमेति
विलीयते पीडितेत्ववकाशेस्मिन्नश्मर्येवचशर्करा १८ अणुशोवायुनाभिन्ना
सात्वस्मिन्ननुलोमगे निरेतिसहमूत्रेणप्रतिलोमेविबध्यते १९ मूत्रसंधारि
णःकुर्याद्रुध्वावस्तेर्मुखंमरुत् मूत्रसंगंरुजंकंडूंकदाचिच्चस्वधामतः २० प्रच्याव्य।
वस्तिमुद्वृत्तंगर्भाभंस्थूलविप्लुतं करोतितत्ररुग्दाहस्पंदनोद्वेष्टनानिच २१ विंदु
शःस्त्रप्रवर्त्तेनमूत्रंवस्तौतुपीडिते धारयाद्विविधोप्येषवातवस्तिरितिस्मृतः २२ दु
स्तरोदुस्तरतरोद्वितीयःप्रबलानिलः शकृन्मार्गस्यवस्तेश्चवायुरंतरमाश्रितः
अष्ठीलाभंघनंग्रंथिंकरोत्यचलमुन्नतं वाताष्ठीलेतिसाध्मानविण्मूत्रानिलसं
गकृत् २४ विगुणःकुंडलीभूतोवस्तौतीव्रव्यथोनिलः आविध्यमूत्रंभ्रमतिस

तान्प्रमेहांश्च कृच्छ्रान्मर्म्मसमाश्रयान् २॥ वस्तिवंक्षणमेढ्रार्त्तियुक्तोल्पाल्पं मुहुर्मुहुः
मूत्रयेद्वातजे कृच्छ्रे पैत्ते पीतं सदाहरुक् ४ रक्तं वा कफजे वस्तिमेढ्रगौरवशोफवान्
सपिच्छं सविबंधं च सर्वैः सर्वात्मकं मलैः ५॥ यदा वायुर्मुखं वस्तेरावृत्य परिशोषये
त् मूत्रं सपित्तं सकफं सशुक्रं वा तदा क्रमात् ६ संजायतेश्मरी घोरा पित्ताद्गोरिव
रोचना श्लेष्माश्रया च सर्वाः स्यादथास्याः पूर्वलक्षणं ७ वस्त्याध्मानं तदासन्नदेशे
षु परितोतिरुक् मूत्रे च वस्तिगंधत्वं मूत्रकृच्छ्रं ज्वरोऽरुचिः ८॥ सामान्यलिंगं रुङ्ना
भिसेवनीवस्तिमूर्द्धसु विशीर्णधारं मूत्रं स्यात्तया मार्गनिरोधने ९ तद्व्यपायात्सु
खं मेहेदच्छं गोमेदकोपमं तत्संक्षोभात् क्षते सास्रमायासाच्चातिरुग्भवेत् १०॥ तत्र
वाताद्भृशार्त्यार्त्तो दंतान्खादति वेपते मृद्नाति मेहनं नाभिं पीडयत्यनिशं क्वणन् ११
सानिलं मुंचति शकृन्मुहुर्मेहति बिंदुशः श्यावा रूक्षाश्मरी चास्य स्याच्चिता कंट
कैरिव १२॥ पित्तेन दह्यते वस्तिः पच्यमान इवोष्मवान् भल्लातकास्थिसंस्थाना रक्ता
पीतासिताश्मरी १३ वस्तिर्निस्तुद्यत इव श्लेष्मणा शीतलो गुरुः अश्मरी महती श्लक्ष्णा

द्रारु

नेमुक्तेस्वास्थ्यंसमश्नुते २२ वातहृद्रोगगुल्मार्शःप्लीहपांडुत्वशंकितः चिरादुःखंद्रा
वंशुष्कं तन्वामंप्शब्दफेनवत् २४ पुनःपुनःसृजेद्वर्चः पायुरुक्श्वासकासवान्
पित्तेनपीतनीलाभंपीताभःसृजतिद्रवं २५ पूत्यम्लोहृत्कंठदाहरुचितृडर्दितः
श्लेष्मणाप्यतेदुःखमन्नंछर्दिररोचकः २६ अस्वापदेहतिष्ठीवकासहृल्लासपीन
साः हृदयंमन्यतेस्त्यानमुदरंस्तिमितंगुरु २७ उद्गारोदुष्टमधुरःसदनस्त्रीष्वहर्षणं
भिन्नामश्लेष्मसंसृष्टगुरुवर्चःप्रवर्त्तनं २८ अकृशस्यापिदौर्बल्यंसर्वजेसर्वसंकरः
विभागंयस्ययेचोक्ताविषमाद्यास्त्वयोग्रयः २९ तेपिस्युर्ग्रहणीदोषाः समस्तुस्वा
स्थ्यकारणं वातव्याध्यश्मरीकुष्टमेहोदरभगंदराः ३० अर्शांसिग्रहणीत्यष्टौमहारो
गाःसुदुस्तराः इत्यष्टांगहृदयनिदानेष्टमोध्यायः ८ अथातोमूत्राघातनिदानं।
व्याख्यास्यामः वस्तिर्वस्तिशिरोमेढ्रकटीवृषणपायवः एकसंबंधनाप्रोक्ता
गुदास्थिविवराश्रयाः १ अधोमुखोपिवस्तिर्हिमूत्रवाहिशिरामुखैः पार्श्वेभ्यःपू
र्यतेसूक्ष्मैः स्पंदमानैरनारतं २ यैस्तैरेवप्रविश्यैनंदोषाःकुर्वंतिविंशतिं मूत्राघा

ओलीयेनातिसार्यंते सामसारेणि सवृला दामुकारी सभावनः साम सान्नम ८

44

कृतेप्यकृतसंज्ञश्च सर्वात्मा सर्वलक्षणः ११ भयेन क्षोभिते चित्ते सपित्तो द्रावयेच्छकृ
वायुस्ततोतिसार्यंत क्षिप्रमुष्णं द्रवं प्लवं १२ वातपित्तसमं लिंगैराहुस्तद्वच्च शोकतः
अतीसारः समासेन द्विधा सामो निरामकः १३ सास्रग्रस्तः तत्राद्यो गौरवादप्सु मं
ज्जति शकृद्दुर्गंधमाटोपविष्टंभार्त्तिप्रसेकिनः १४ विपरीतो निरामस्तु कफात्पा
क्कोपि मज्जति" अतीसारे व्युयो नाति यत्नवान् ग्रहणीगदः तस्य स्यादग्निविध्वंसकै
रन्यस्य सेवितैः" सामं शकृन्निरामं वा जीर्णेन्नेजीर्णे पक्वं तु नैव वा अकस्माद्दा मुहु
र्बद्धमकस्मात् शिथिलं मुहुः चिरकृद् ग्रहणीदोषः संचयाच्चोपवेशयेत् १७" स चतु
र्द्धा पृथग्दोषैः सन्निपाताच्च जायते प्राग्रूपं तस्य सदनं चिरात्पचनमम्लकः प्रसेको
वक्त्रवैरस्यमरुचिस्तृट् क्लमो भ्रमः आनद्धोदरता छर्दिः कर्णक्ष्वेडोन्त्रकूजनं १९ ।
सामान्यलक्षणं कार्श्यं धूमकस्तमको ज्वरः मूर्छा शिरोरुग्विष्टंभः श्वयथुः करपाद
योः २१" तत्रानिलात्तालुशोषस्तिमिरं कर्णयोः स्वनः पार्श्वोरुवंक्षणग्रीवारुजाभी
क्ष्णं विषूचिका २२ रसेष्वगृद्धिः सर्वेषु तृष्णा परिकर्तिका जीर्णे जीर्यति चाध्मा

...तः अरोचि... विकाराः प्रायेण येऽन्योन्यनिदानजास्ततः अतीसारनिदानं व्याख्यास्यामः ॥१॥

ऽध्यायः ७ अथातोऽतीसारग्रहणीरोगयोर्निदानं व्याख्यास्यामः दोषैर्व्यस्तैः समस्तैश्च भयाच्छोकाच्च षड्विधः अतीसारः स सुतरां जायतेत्यंबुपानतः १ कृशशुष्कामिषासात्म्यतिलपिष्टविरूढकैः मद्यरूक्षातिमात्रान्नैरर्शोभिः स्नेहविभ्रमात् २ कृमिभ्यो वेगरोधाच्च तद्विधैः कुपितोऽनिलः विस्रंसयत्यधोब्धातुं हत्वा तेनैव चानलं ३ व्यापद्यानु शकृत्कोष्ठं पुरीषं द्रवतां नयन् प्रकल्पतेऽतिसाराय लक्षणं तस्य भाविनः ४ तोदो हृद्गुदकोष्ठेषु गात्रसादो मलग्रहः आध्मानमविपाकश्च तत्र वातेन विड्जलं ५ अल्पाल्पं शब्दशूलाढ्यं विबद्धमुपवेश्यते रूक्षं सफेनमच्छं च ग्रथितं वा मुहुर्मुहुः ६ तथा दग्धगुडाभासं सपिच्छापरिकर्तिकं शुष्कास्यो भ्रष्टपायुश्च हृष्टरोमा विनिष्टनन् ७ पित्तेन पीतमसितं हारिद्रं शाद्वलप्रभं सरक्तमतिदुर्गंधं तृण्मूर्छास्वेददाहवान् ८ सशूलं पायुसंतापपाकवान् श्लेष्मणा घनं पिच्छिलं तंतुमच्छ्वेतं स्निग्धमामं कफान्वितं ९ अभीक्ष्णं गुरु दुर्गंधं विबद्धमनुबद्धरुक् निद्रालुरलसोऽन्नद्विडल्पाल्पं सप्रवाहिकं १० सरोमहर्षः सोत्क्लेशो गुरुबस्तिगुदोदरः

१५

स्नेहकारिरिति व्यापथ॥

किं कुर्वन् स्तनन् कोथिनि कथन उपवेश्य तेषां॥

वा१

दर

राम १५

46

यथुसेवमः पवनस्यार्द्दगामित्वंततःछर्द्दिरुचिज्वराः ५९ हृद्रोगग्रहणीदोषमू
त्रसंगप्रवाहिकाः वाधिर्यतिमरश्वासशिरोरुक्कासपीनसाः ६० मनोविकारस्तृष्णा
स्रपित्तगुल्मोदरादयः तेतेचवातजारोगाजायंते भृशदारुणाः ६१ दुर्नाम्नामि
त्युदावर्त्तः परमोयमुपद्रवः वाताभिभूतकोष्ठानांतैर्विनापिसजायते ६२ सह
जानित्रिदोषाणियानिचाभ्यंतरेवलौ स्थितानितान्यसाध्यानियाप्यंतेग्निव
लादिभिः ६३ द्वंद्वयानिद्वितीयायांवलौयान्याश्रितानिच कृच्छ्रसाध्यानितान्या
हुः परिसंवत्सराणिच वाह्यायांतुवलौजातानेकदोषोल्वणानिच अर्शांसिसु
खसाध्यानिनचिरात्पतितानिच ६४ मेढ्रादिष्वपिवक्ष्यंतेयथास्वंनाभिजानितु
गंडुपदास्यरूपाणिपिछिलानिमृदूनिच व्यानोगृहीत्वाश्लेष्माणंकरोत्यर्शस्त्व
चोवहिः कीलोपमंस्थिरखरंचर्मकीलंतुतंविदुः ६७ वातेनतोदःपारुष्यंपित्ता
दसितरक्तताश्लेष्मणास्निग्धतातस्यग्रथितत्वंसवर्णता अर्शसांप्रशमेयत्नमाशु
कुर्वीतबुद्धिमान् तान्याशुहिगुदंवध्वाकुर्युर्बद्धगुदोदरं ६९ इत्यष्टांगहृदयेसप्त

रूक्षाः कंडूबाधास्पर्शनप्रियाः करीरपनसास्थ्याभास्तथागोस्तनसन्निभाः वंक्षणाना
हिनः पायुवस्तिनाभिविकर्तिनः ४९ सकासश्वासहृल्लासप्रसेकारुचिपीनसाः
मेहकृछ्रशिरोजाड्य शिशिरज्वरकारिणः ५० क्लैब्याग्निमार्दवछर्दिरामप्रायविका
रदाः वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः ५१ नस्रवंतिनभिद्यंतेपांडु
स्निग्धत्वगादयः संसृष्टलिंगाः संसर्गात्त्रिचयात्सर्वलक्षणाः ५२ रक्तोल्बा
णा गुदे कीला पित्ताकृतिसमन्विताः वटप्ररोहसदृशा गुंजाविद्रुमसन्निभाः ५३
तेत्यर्थं दुष्टमुष्णं च गाढविट्प्रतिपीडिताः स्रवंति सहसा रक्तं तस्य चातिप्रव
त्तितः ५४ भेकाभः पीड्यते दुःखैः शोणितक्षयसंभवैः हीनवर्णबलोत्साहोह
तौजाः कलुषेंद्रियः ५५ मुद्गकोद्रवजूर्णाह्वकरीरचणकादिभिः रूक्षैः संग्राहि
भिर्वायुः स्वस्थाने कुपितो बली ५६ अधोवहानि स्रोतांसि संरुध्याधः प्रशोषय
न् पुरीषं वातविण्मूत्रसंगं कुर्वीत दारुणं ५७ तेन तीव्रा रुजा कोष्ठपृष्ठहृत्पार्श्व
गा भवेत् आध्मानमुदरावेष्टो हृल्लासः परीकर्तनं ५८ वस्तौ च सुतरां शूलं गंडश्व

२४

राम
२४

47

दि३

दुपीतंहरिद्रक्तं पिच्छलं चोपवेश्यते गुदांकुराबहूनिलाः शुष्काश्चिमचिमान्वि
ताः म्लानाः श्यावारुणाः स्तब्धा विषमाः परुषाः खराः मिथो विसदृशा वक्रास्ती
क्ष्णा विस्फुटिताननाः १० बिंबीकर्कंधुखर्जूरकार्पासीफलसन्निभाः केचित्कदं
बपुष्पाभाः केचित्सिद्धार्थकोपमाः शिरःपार्श्वांसकट्यूरुवंक्षणाभ्यधिकव्यथाः
क्षवथूद्गारविष्टंभहृद्ग्रहारोचकप्रदाः ११ कासश्वासाग्निवैषम्यकर्णनादभ्रमाव
हाः तैरार्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकं १२ रुक्फेनपिच्छानुगतं विबद्ध
मुपवेश्यते कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते १३ गुल्मप्लीहोदराष्ठी।
लासंभवस्तत एव च पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः १४ तन्वस्रस्रा
विणो विस्रास्तनवो मृदवः श्लथाः शुकजिह्वायकृत्खंडजलौकोवक्त्रसन्निभाः १५
दाहपाकज्वरस्वेदतृण्मूर्छारुचिमोहदाः सोष्माणो द्रवनीलोष्णपीतरक्तामव
र्चसः यवमध्या हरित्पीता हारिद्रत्वङ्नखादयः श्लेष्मोल्बणा महामूला घना मंद
रुजः सिताः उच्छूनोपचिताः स्निग्धास्तब्धवृत्तगुरुस्थिराः पिच्छिलास्तिमिताः श्ल

१२ गेनत्रयोः शोकः पूर्वकट्वेदोथवाग्रहः॥ मारुतः प्रचुरो मूढः प्रायोनाभेरधश्चरन् सनक
सपीकर्त्तस्थलक्ष्मान्निर्गच्छतित्वसन् १७ अन्त्रकूजनमाटोपः क्षामतोद्गारभूरिता
प्रभूतंमूत्रमल्पाविडश्रद्धाधूमकोम्लकः १८ शिरःपृष्ठोरसांशूलमालस्यंभिन्नवर्णि
ता तंद्रेंद्रियाणांदौर्बल्यं क्रोधोदुःखोपचारता १९ आशंकाग्रहणीदोषपांडुगुल्मो
वप दरेषुच एतान्येवविवर्द्धन्तिजातेषुहतनामसु २० निवर्त्तमानोंहिहैतैरधोमार्गेतेधनः पाञेप
क्षोभयन्ननिलानन्यान् सर्वेंद्रियशरीरगान् २१ तथामूत्रशकृ तकफानुधा लिप्र
तेश्रमापशवान् गूद्वात्यग्निंततः सर्वोभवतिप्रायसोर्शसः २२ कृशोभ्रंशहतोत्सा
हो दीनः क्षामोतिनिःप्रभः असारोविगतच्छायोजंतुजुष्टइवद्रुमः २३ कृत्स्नैरुपद्र
वैर्युक्तोयथोक्तैर्मर्मपीडनैः तथाकासपिपासास्यवैरस्यश्वासपीनसैः क्लमांग
सादवमथुक्षवथुश्वयथुज्वरैः॥ क्लैव्यबाधिर्यतैमिर्यशर्कराश्मरीपीडितः २४ क्षामभि
न्नस्वरोध्यायन् मुहुःष्ठीवन्नरोचकी सर्वपर्वास्थिहृन्नाभिपायुवंक्षणशूलवान् २५
गुदेनस्रवताच्छ(पि)पुलाकोदकसन्निभं विबद्धमुक्तंशुष्कार्द्रंपक्वामंचांतरांतरा यां

ध्यर्द्धः प्रमाणेन सोमाणपत्रततः यवं ॥ ५ ॥ तत्रहेतुसहोत्थानेवलीवीजोपतप्तता अर्शी
सांबीजतप्तिस्तुमातापित्रपचारतः ६ दैवाच्चताभ्यांकोपोहिसन्निपातस्पतान्यतः
असाध्यान्येवमाख्याताः सर्वेरोगाकुलोद्भवाः ७ सहजानिविशेषेण रूक्षदुर्दर्शना
नि च अंतर्मुखानि पांडुनि दारुणोपद्रवाणि च ८ षोढान्यानिपृथग्दोषसंसर्गनि
चयास्रतः ॥ शुष्काणिवातश्लेष्माभ्यामार्द्राणित्वस्रपित्ततः ९ दोषप्रकोपहेतुस्तु
प्रागुक्तस्तेनसादिते अग्नौमलेतिनिचितेपुनश्चातिव्यवायतः १० यानसंक्षोभ
